चापोत्कटकृतः

सुवर्णबिन्दुः

"It is with unaffected pleasure that
I introduce this little garland of
poems to the discerning public."

C. P. RAMASWAMI AIYAR

★

सु व र्ण बि न्दु:

" it is with unaffected pleasure that
I introduce this little garland of
poems to the discerning public."

C. P. RAMASWAMI AIYAR

रचयिता

बहादुर चन्द छाबड़ा

With the best compliments
B. Ch. Chhabra

FOREWORD

Dr. Chhabra has been known to students of Indian culture in our country and abroad not only as a painstaking archaeologist who has made original contribution of value to that science, but also as a deep student of every period and aspect of Sanskrit literature and in addition as a poet of distinction.

The present volume issued under the title of Suvarṇabindu commences with a vandanā or salutation to Śiva as Āśutosha the Accessible One and to the Goddess of Speech. In a melodious set of verses, entitled Sumitrāpanchadaśī an original and pleasing description is presented of the mother of Lakshmaṇa and Śatrughuna. Among other pieces there is a fine description of Mathurā as well as a very striking short poem on the Lord Buddha. The little volume ends with a translation of an English poem by Cowper addressed To a Young Lady.

All the poems in this volume evince an enviable command of Sanskrit prosody and metres and the author's style is remarkably free from exaggeration of style or sentiment. Dr. Chhabra also possesses a keen ear for rhythm and it is with unaffected pleasure that I introduce this little garland of poems to the discerning public.

C.P. RAMASWAMI AIYAR

Delisle
Ootacamund, 27th August 1951.

I N T R O D U C T I O N

There is nothing new under the sun. The ocean is the same old ocean -- ages old ! The waves alone are new. Each surging billow that heaves from the depths and breaks into laughter at the beach is closely followed by another. And so the illusion of variety and freshness is kept up. The little volume lays no claim to novelty, except as a wave.

Sanskrit came to the author as a hobby, and as a hobby it stays with him, though it has, in a way, become a source of his very livelihood. It came to him late in his boyhood in the utter distraction that followed the death of his widowed mother. Almost imperceptibly Sanskrit took the place of both father and mother to him. So would it comfort him, so would it encourage him, and so would it delight him !

The medley of verses presented here has been culled from his random compositions, dating from 1925 onwards. They were meant more for his own diversion. The idea of putting them together in the form of a booklet was kindly suggested by Dr. V. Raghavan, Head of the Department of Sanskrit, University of Madras. Dr. Raghavan is one of those lovers of Sanskrit who themselves compose in that divine language. Some of his excellent poems have already appeared in print. Like many a modern Sanskritist he maintains that the cause of Sanskrit learning is better served by producing original compositions side by side with the study of Sanskrit classics. The creative urge in the realm of Sanskrit literature today, in the opinion of the present author, deserves all encouragement.

The title Suvarṇabindu requires an explanation. In the present context it may be taken to stand for A MISCELLANY OF BELLE LETTRES. Its primary sense of 'gold drop' imparts the idea of embellishment. Suvarṇabindu as a compound word is again one of the significant appellations of Vishnu, the All-pervasive Divinity. Its adoption here is designed to convey homage to that Divinity as also to the author's father whose name was Bishan Das (i.e. Vishṇudāsa).

Vishṃu has been alluded to again and again, under various names, in the poems presented here. Pushpahāsa, Apramatta, Anirvinṇa, Ānanda, Pradyumna, Amitavikrama, so on and so forth.

Some of the poems of this collection have already been published. That on Pipīlikā, for instance, appeared in the Sanskrit weekly Suprabhatam (now defunct) of Banaras, in about 1927. Another, entitled Sumitrāpanchadasī, won a prize and has been published in the Premi Abhinandan Granth in 1946. Yet another, captioned Anuśaya, has appeared in the Amṛitavāṇī of Banglore in its issue for 1947. In these last two peoms, the author has mentioned his surname Chhabra, plafully Sanskritised as Śābra, though in reality, like Chavda and Chawla, it is a contracted form of Chāpotkata, the three sub-castes having one common origin.

The sentiments expressed in the poem under the heading Mitrārchih, published likewise in the Amṛitavaṇī of Banglore in its issue for 1951, were stimulated by a very real experience that had fallen to the lot of the author.

Vandanā has had the blessings of the sage of the Arunachala, Ramana Maharshi, who was gracious enough to repeat, as a mark of approbation, its second couplet, in a letter addressed to the author:

Aho bhāgyam aho bhāgyam
svayain sākshān Maheśvarah !
yogakshemam vahety esha
mādrisasyalpamedhasah ! !

BAHADUR

समर्पणम्

अभिनवसुमनोग्रथितां सुगुणां सरसां सुवासिनीं मालाम् ।
अवसंजयामि कण्ठे सुवर्णबिन्दोः सुवर्णबिन्दुमिमाम् ।।

वन्दना

सर्वभावेन भोः शम्भो भवन्तं भावयाम्यहम् ।
भूरिभव्य प्रदातारं सर्वेदुःखनिवारकम् ।।१।।

अहोभाग्यमहो भाग्यं स्वयं साक्षान्महेश्वरः ।
योगक्षेमं वहत्येष मादृशस्याल्पमेधसः ।।२।।

धन्योस्मि कृतकृत्योस्मि सुकृती कृतिनां वरः ।
देवदेवो भवान् यन्मां स्वयं रक्षत्यहर्निशम् ।।३।।

भवद्वात्सल्यमेवैतत् सौख्यान्यनुभवामि यत् ।
जयाभ्युदयकीर्त्याढ्यो वीतचिन्तो निरामयः ।।४।।

आचरेयं तथाकारं मनोवाक्कायकर्मभिः ।
यथा मे भगवान् नित्यमाशुतोषः प्रसीदतु ।।५।।

-०-०-०-०-

वाणी प्रणामाञ्जलिः

मातर्वाणि नमामि ते पदयुगं कञ्जं सितं कोमलं :
यत् त्वन्निष्टरभूतशुभ्रकमलात् केनापि नामेत्स्यत ।
ऋते वेदतिशोभनाः स्फुटतरास्ताम्राः प्रवलोज्ज्वला
ह्रस्वानुक्रमसंविभागमधिला नैवामविष्यन्नखाः ।।

-०-०-०-०-

नि वे द न म्

पूर्वेषां विदुषामतीव सरसं सारस्वतं सारवत्
पीयूषं परिपीय तृप्तमनसो यन्मेभवच्चापलम् ।
तेनैवेदमनर्गलं प्रलपनं नैनन्निरोद्धुं क्षमे
स्वच्छन्दं बहिरच्छलच्छति मुखाद्धारा प्रवाह: स्फुट: ।।१।।

आदेरनाविलजला भुवि पर्वतेभ्यो
वह्व्यो वहन्ति परित: सरितो मनोज्ञा: ।
काश्चिन्निरन्तरमखण्डरसं स्रवन्ति
शुष्यन्ति काश्चिदपरा नवमुद्भवन्ति ।।२।।

नव्यासु तावदियमेकतमा स्रवन्ती
विष्णो: पदाब्जयुगलं परिधावयन्ती ।
नश्यत्यजस्रमथवा परिशोष्यतीयं
कस्यापि तृप्तिमपि धास्यति तन्न जाने ।।३।।

वीरदेव्यां समुत्पन्नो विष्णुदासस्य नन्दन: ।
चापोत्कटकुलोद्भूत: कविरस्या बहादुर: ।।४।।

शब्दाडम्बरमेव ये विदधते तेषां वर: को गुण-
स्ते गुण्या: सरलै: पदै: कतिपयैर्येयान् बहूंस्तन्वते
नालंकारभरेण भाति युवतिर्नाप्यङ्गैकरुग्लक्षणै-
राकृत्यैव तु हावभावभृतया मुष्णाति यूनां मन:।।५।।

-0-0-0-0-0-0-

पुष्पहासः

मनोविकासः सुमनोविकासः
स एव साक्षान्नु पुष्पहासः ।
तदेव विष्णोः परमं स्वरूपं
तदात्मभूयाय भजेमिरूपम् ।।१।।

अयि चित्त चेत संस्मर बहु खल्वपि तेस्ति करणीयम्
तावल्लघु संपादय यावन्नायुष्मत्यैति ।।२।।

पुनरपि संस्मर चेतः स्थिती बत तिस्ति शक्तिरतिमहती ।
ननु पर्वतमपि भिन्धा अध्यवसायो दृढस्तव चेत् ।।३।।

विष्णुर्जिगाय विश्वं न नाप्रमत्तो न नाप्यनिर्विण्णः।
तद्भूत्वाप्रमत्तं तद्भूत्वाप्येष्यनिर्विण्णम् ।।४।।

-०-०-०-०-०-

पिपीलिका

दुग्धः समायासि भगो पिपीलिके
प्रयासि कं देशमथो कृशोदरि ।
अहो प्रयासस्तव चारुरिंगणि
उद्दूढभारापि सुखं पलायसे ।। १ ।।

इयं तवातीव तनीयसी तनुः
मुखं कथं भूचिशिरोमितं लघु ।
नितान्ततान्तानि पदानि ते यथा
मृणालतन्तूनतिशेरतेतराम् ।। २ ।।

कथं पुनस्तंडुल दर्ष शारवान्
उदुह्यमानो मृदुना मुखेन ते ।
न बनधते त्वां त्रिगुणोपि ते भराद्
इदं मदीयं कुतुकं विनीयताम् ।। ३ ।।

अहो शुभं साधुसमागमः पुमन्
परं प्रसीदामि तवागमाद्धम् ।
परं विषीदामि यतो न पारये
परस्परं संलपितुं चिराय वै ।।४।।

न मेवकाशः सुमतेभिभाषितं
तथापि मन्दामधमां वशंवदाम् ।
कुतूहलं ते विनशीकरोति माम्
उदन्नजातं गदितुं मनाङ् निजम् ।।५।।

समस्तलोकस्तु तृणाय मन्यते
धृतां न मां स्तौति मृतां न शोचति ।
तथापि शोकातिगना दिवानिशं
श्रमेण सूतां मधुरां मुदं स्वदे ।।६।।

विलोक्य तान्तां तनुमेव केवलं
न निर्वलां मामवगच्छ मानव ।
अलं बलं मे परमात्मनार्पितं
यथात्मरक्षां विदधे निरन्तरम् ।।७।।

मृजन्ति तुन्दं सततं महाशना
न पारयन्ते चलितुं रथाङ्गिना ।
गृहेषु मंचानविशेरते च ये
न विद्धि तेस्थः खलु मां लघीयसीम् ।।८।।

मुधा प्रशंसन्ति पृथग्जनान् सदा
गृणन्ति दीनानि वचांसि पामरान् ।
करान् वितन्वन्ति च ये ऋणं विना
न विद्धि तेभ्यः किल मां लघीयसीम् ।।९।।

कणं कणं धान्यमितस्ततो बिले
श्रमं श्रमं साधु कथं कथं चितम् ।
मुदा स्वदे नास्ति भयं कुतश्चन
ऋणं न कस्मैचन धारयै भुवि ।।१०।।

न यावदायान्ति घना घनाम्बवश्
चिरोमि धान्यं लघु तावदन्वहम् ।
तदर्थमेतं नवतंडुलं दहे
मया हि कोशः परिपूरयिष्यते ।।११।।

विपत्प्रतीकारकृते पुराकृतः
फलन्त्युपाया न तु तत्क्षणं कृताः ।
तदर्थमेतं नवतण्डुलं वहे
जहीहि मार्गं समयो विलम्बते ।।१२।।

-०-०-०-०-०-

सु मि त्रा पं च द शी

जयति सुमित्रा साध्वी पुत्रवतीनां लालाभूता सा ।
लक्ष्मणसदृशं वीरं जितेन्द्रियं या सुतं सुषुवे ।। १ ।।
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
इत्यादि यादिशत्पुत्रं सा सुमित्रा महीयते ।। २ ।।
यमौ सुमित्रा तनयावजीजनत्
पशस्तनीयौ भुवि यौ मनस्विनौ ।
निजाग्रजादेशवशंवदौ स्वकं
कुलं कुलीनौ प्रथयाम्बभूवतुः ।। ३ ।।

लक्ष्मणशत्रुघ्नौ तौ क्रमशो बाल्यादि रामभरताभ्याम् ।
प्राय: सौमित्रगुणैरास्तां नखमांसवत्स्थितौ ॥४॥

रामाय लक्ष्मणं दत्वा शत्रुघ्नं भरताय च ।
कौसल्यामिव कैकेयी सुमित्रारंजयत्सती ॥ ५॥

कैकेयीं प्रति मत्सरं न भेजे
कौसल्यां प्रति नातिपक्षपातम् ।
दुष्टादुष्टमचिन्वती सपत्न्यो:
सौमित्रिं समदर्शयत्सुमित्रा ॥६॥

हन्त सुमित्रा व्यौंजीदुदारतायाः परां काष्ठाम् ।
परकीयेषु निजेष्वः प्रकाशयन्ती गरीयसीं ममतार्म ॥७॥

धन्यासि त्वं सुमित्रे कृतमतिकठिनं कर्म धर्म्यं त्वया वै
दास्ये द्यूनो: सपत्न्याश्चिरवनवसति यास्यतो राघवस्य ।
ज्यायांसं यन्न्यधुक्थ: प्रमुदितमनसा लक्ष्मणं कुक्षिजं स्वं
यत्सोप्यासां यथावत् नव खलु कृतवांस्तेन भूयोसि धन्या ॥८॥

पिता रामेत्यादिशन्नानवार्तं
स्वतन्त्रोपि यत्तमामणस्तेन सार्धम् ।
गतोमुक्त दु:खानि मूर्यांसि साधु:
सुमित्रोपदेशस्तु तत्राप्रहेतु: ॥९॥

क्वं बालोन्वाया: सरसमुपदेशैर्गुणगणै
क्वं माता कीर्तिं सुकृणकिरिम्ना च लभते ।
सुमित्रासौमित्री इदमुभयमर्थं निवृणुत:
सरस्यम्भोजौ वा प्रतिफलितरोभौ खलु मिथ: ॥१०॥

रामेरण्यं यातयत्यात्मजं वा
कौसल्यां यत्सर्वदासान्त्वयत्सा ।

न्यक्कुर्वाणा स्वं विषादं सुमित्रा
निर्व्याजं तत्सौभगिन्यं सपत्न्याम् ।।११।।

पत्यू राजर्षित्वाद् ऋषिपत्न्यो दशरथस्य पत्न्योपि ।
किन्तु सुमित्रा तासाम् ऋषिपत्न्यासीद् विशेषेण ।।१२।।

अनसूया तपोनिष्ठा नम्रता समदर्शिता ।
इमिरार्षीर्गुणैरासीत् सुमित्रा सुतरामृषिः ।।१३।।

आत्मत्यागशुशीतलामलजला शीलार्जवोद्घट्टा
सत्यस्नेहसहिष्णुतोत्पलचया भक्तिप्रवाहोद्धुरा ।
धृत्युत्साहविवेकधीरुचिरा धैर्यैरुसत्वान्विता
सेयं मानवपावनी विजयते चित्रा सुमित्रा नदी ।।१४।।

वाल्मीकिपूर्वैरपरिकीर्तितसच्चरित्राम्
आश्रित्य लक्ष्मणायतेर्जननीं सुमित्राम् ।
गीर्वाणगीरभिनिवेशगुणा प्रशस्तिः
केनापि शाबरवरेण कृतेयमस्ति ।। १५ ।।

-०-०-०-०-०-

अनुशयः

अवधीरितं मयाभूद उपनतमासीद्यदा यदृच्छातः ।
धिक् प्रज्ञाशून्यं माम् सम्प्रति ताम्यामि तदवाप्तुम् ।।१।।
नैकमपि वेतुमैच्छं धारासारं यदाभ्यवर्षन्मे ।
मुक्ता फलानि तानि क्वे दानीं हन्त यातानि ।।२।।
अक्षत वृथा सुमनसः सुधे मुधवाभ्रस्त्वमपि मह्यम् ।
सा सान्द्रा मे जडता ह्यवकाशं वः कुतोदास्यत् ।।३।।
व्याप्या
केनावृता मतिर्मे केनाच्छास्तां च मेदिणी पिहिते ।
स्वयमुपसन्नां लक्ष्मीं नाकलयं येन मन्दोहम् ।।४।।

पीत्वेवासं सुप्तः किं वा क्वेडेन मूर्च्छितोतिष्ठम् ।
आहत्य मे कपाटं यातो नालक्षायं सिद्धिम् ।।५।।

प्रभयोद्भ्रान्तेन मया सख्या यदपासि कामभित कृत्वा ।
तच्चिन्तामणिरासीद् व्याधिर् देवेन मुषितोस्मि ।।६।।

सा सुषमा सा कान्तिस्तल्लावण्यं च तच्च तारल्यम् ।
ननु रत्नं न गृह्वामधुना किं तद्गुणान् गत्वा ।।७।।

सकृदुपसर्पेति कालश्चूडाग्राहं स च गृहीतव्यः ।
यो न तथा गृह्णीते तस्यानिशमनुशयः शरणम् ।।८।।

कल्पलतामिव मोहान्निर्दयमुन्मूल्य स्वयं स्वहस्तेन ।
स्वां शावरतां व्यंजन् सोहं स्थानेनुशोचामि ।।९।।

-०-०-०-०-

आनंद संबोधनम्

अहयानंद । किमर्थमर्दयसि मां प्रायः प्रवासं वसन्
सप्ताहा व्यतियान्ति नैषि पुनराः । कष्टं करोष्यातुरे ।
आयातोपि कदाचिदाचरुणो न त्वं चिरं तिष्ठसि
श्रेयांसं किमु नैव कल्पयसि भोः । स्वीयं निवासं मयि ? ।।१।।

स्वैरं पक्षिवदम्बरे विहरणं यस्यास्ति शीलं तव
किं नानन्द । मनाग् ममैव हृदये स त्वं लभेथा रतिम् ?
नूनं शून्यमिदं यथाम्बरमदः प्रायोन्धकार वृतं ।
नैराश्यं च पुनः समानमुभयोर्भूयः किमाकांक्षसि ? ।।२।।

श्लिष्यामीव समस्त वस्तुनिकरं चुम्बामि चर्वाम्यथो
अन्तर्वा विशामि दूरमपि वा लीये विलीये क्वचित् ।
भूमौ वा दिवि वा वसामि किमुषा सर्वत्र नैकत्र वा
यत्सत्यं त्वदधिष्ठि तस्य मम सा सर्वा स्मृतिर्लुप्यते ।।३।।

यं स्त्रीपुंसौ प्रसक्तौ क्षणिकमपि बहुं मन्यमानौ एमेते
खिद्यते यं विना वा क्षणमपि बहुशो जीवितं गर्हमाणौ ।
तस्यानन्दस्य नूनं क्षतिदतिविपुलं शाश्वतं धाम भावि
तद्गच्छान्विच्छ चेतः । किमिति निरवधि क्लिश्यसि
व्यर्थमेव त्व ।।४।।
यं कीर्तिप्रयत्नात् सकलमधिगुणं कर्म निष्पाद्य सम्यग्
नेता यं वा चमूनां त्रिपदमभिसरन् दुर्गमाक्रम्य कृच्छ्रात् ।
यं वा तीर्त्वा परीक्षां गणतिथवपसा विदन्तो ब्रह्मचारी
तस्यानंदस्य भागी भव । तव वृथया सर्वदाहं भवेयम् ।।५।।

-०-०-०-०-०-

प्रातरागमनम्

अयमुद्गच्छति भानुर्मामुपगच्छन्तमवलोक्य ।
आलिंगितुमिव हर्षात् प्रसारयन् निजकरान् पुरतः।।१।।

अयमभिनन्दति पवनः प्रसन्नमनसा मदीयमागमनम् ।
मोदातिरेकमयः सस्यनमद्धूनर्यल्लतावृक्षम् ।।२।।

अयमपि वङ्गसंधः संगायन कलरवेणोच्चैः ।
उद्घोषयति प्रीतो मामेव नूनं समागमनम् ।।३।।

-०-०-०-०-०-

द्यावापृथिव्यौ

अभिनन्दति घनसुर्क दिनमणिमंडितमभेयवैदूर्यम् ।
आकाशमर्थवन्तं प्रफुल्लसुमना मही लुब्धा ।।

-०-०-०-०-०-०-

मथुरा महिमा

जयतितरां व्रजभूमिर्धन्या पुण्याप्यनन्यसामान्या ।
सकलाकलासम्पूर्णो भगवानवतीर्णवान् यस्याम् ।।१।।

जयति पुनर्मथुराख्या व्रजभूमेः सारभूता सा ।
अतुयमुनं विविनविष्टा स्फीता रम्या महानगरी।।२।।

श्रीकृष्णबाललीलास्थलीति साधपि तीर्थरूपेण ।
धर्मार्थकाममोक्षप्रवर्णैः संश्रीयते भक्त्या ।। ३ ।।

भुवनं भूषति कृष्णे मथुरा सुतरां बभूव सम्पन्ना ।
कालक्रमेण किन्तु प्राप्नोत्सोच्चावचान् भावान् ।।४।।

संवत्कर्तरि शासति भूमे श्रीविक्रमादित्ये ।
पुनरेवाधत्त लोके भाग्यं विचकास मथुरायाः ।।५।।

शमवर्तितिकल्पयनं नानाधर्मानुयायिनां मथुरा ।
शेषां मुख्या आसंश्चौद्धाश्च जैनाश्च ।।६।।

तेषामेव महिम्ना सालंकारेव सा पुरी रेजे ।
मन्दिरविहारचैत्यस्तूपादिभिश्चापि ।।७।।

दिक्चतुरापणीये महापथे सुस्थितं निविष्टेति ।
मथुरा बभूव नूनं वाणिज्यस्यापि गुरु केन्द्रम् ।।८।।

सर्वासु दिक्षु ददृशे यातयातं हि सार्थवाहानाम् ।
शकटैरनिशं वहतां मथुरागामीनि भाण्डानि ।। ९ ।।

तद्धल्लालितकलानां मथुरैवासीच्चदा सदावासः ।
मूर्तिकला तु विशेषात् तत्रारेहत्परां काष्ठाम् ।।१०।।

मथुरां निकषा लब्धा भग्नाभग्नाः सहस्रशः प्रतिमाः ।
मथुरं प्रमाणयन्ति प्राचीनं तत्कलोत्कर्षम् ।।११।।

एतादृशी समृद्धा मथुराकर्षन्निहूंजिगीषून् यत् ।
तत्स्वामाविक्रमाक्षीन्मल्लीं भ्रमरा: कथं जह्यु: ।।१२।।

मौर्या शुंग यवना: शका: कुषाणास्तथान्यराजन्या: ।
क्रमश: शशासुरेतां मथुरां निजविक्रमाक्रान्ताम् ।।१३।।

यावद्विक्रमवन्त: सन्त्यधुना हन्त नामशेषास्ते ।
तावत्सैषा मथुरा महीयते भूर्वल्लोके ।। १४ ।।

-०-०-०-०००-

प्र बु द्धो चि त वि क्र म :

- - - - - - - - - - - -

शिवादन्यत्र बुद्धाज्ञा जितं येनाखिलं जगत् ।
तं कामं विश्वजेतारं तौ च कामजितौ नुम: ।।१ ।।

किंजित: शम्भुना काम: बुद्धेनापि किंजित: ।
प्रम-नात्येव य: सर्वान् यथापूर्वं निरन्तरम् ।।२।।

स शिव: किंपचाख्य: स जिन: किंशाक्यसिंहो वा ।
नानेन नामुना वा यन्नि: शेषं स पेषितो मदन: ।।३।।

काभ्यां य: सिंहाभ्यां मनसिज । पोथितविमर्दितोपि त्वम् ।
मूर्च्छेस्येवाजस्रं तं त्वा मन्ये महाप्राणम् ।।४।।

-०-०-०-०-०-

मि त्रा र्थि:

- - - - -

मैत्री मित्र । जगत्त्रयेस्ति मधुर सारं परं संपदाम्
अन्यत्सर्वमसारमेव नितराम् आपातरम्यं ध्रुवम् ।
किंदारा: किमु पुत्रका: किमपत्या ये चेतरे बान्धवा:
सर्वे: स्वार्थपरायणोनुरजते मित्रं तु नि:स्वार्थकम् ।।१।।

एकंचिद् यदि तादृशं हितकरं
मित्रं भवेत्प्राणिनः
स प्राणी कृतिनां वरोस्ति धरणौ नान्योस्ति धन्यस्ततः ।
अस्तं तस्य समस्तमेव कलिलं चिन्तापि चान्तं गता ।
मित्रस्पर्शमवाप्य भाग्यकलं तस्योपदुन्मीलति ।।२।।

मित्रं कृच्छ्रात्समुद्धर्तुं यथा मित्रं प्रयास्यति ।
किं तया बान्धवैः शक्यं ये विजानन्ति भंडितुम् ।।३।।

माता पुत्रं भर्त्सयेज्जातदोषं तातोप्येनं व्याहरेत्ताडयेच्च ।
मित्रं त्वस्याचिन्तयद्दोषजातं जातं क्लेशं नाशयत्येव जोषम् ।।४।।

अविमृश्य प्रवर्तेत मुहुः कार्यमेजो विवेकपरिपाकम् ।
इति जनमुज्जेत्स्वजनो मित्रं त्वाश्वासयत्येनम् ।।५।।

यावन्न यान्ति समयं स्वजनाः स्वतिलानि घोषयन्तोस्य ।
सन्मित्रमस्य तावद् विपत्प्रतीकारमाचरति ।।६।।

मित्रं मित्रहिताय येन विधिना रात्रिंदिवा चेष्टते
कर्तुं वेद मनागपीश मनुजो भुक्त्वा तदेव स्वयम् ।
जानीते जननी न तस्य जनको नाधीगिनी नांगजो
यत्सत्यं परमात्मनोपि रक्षा साध्नोति मित्रस्य तत् ।।७।।

दैवादुपेतमपनेतुमपायमस्य मित्रस्य मित्रमुचितं विदधात्युपायम् ।
अस्योपकारकरणस्य फलं स्वकीयं नाम्नापि हन्त न च किंचन
वांछतीदम् ।।८।।

मित्रयोरैकमत्येपि वैमत्यं दृष्टमत्र वै ।
एकः कृतमपन्होतुमन्यः प्रख्यातुमीहते ।।९।।

न जाति नाशते मैत्री न देशं न दशापि ।
एकं स्वभावयोरैक्यमवाप्याप्यायते भृशम् ।।१०।।

गंगायमुनयो: संग: संगतं खलु मित्रयो: ।
पृथग्देशसमुद्भूते पृथग्वर्णे च किं तत: ।।११।।

लोक: संस्मरित प्रियं कृतयुगं त्रेतां तथा द्वापरं
पापीयानिति कर्कशं च सकल: कालं कलिं क्रोशति ।
यस्मिन्नेव दशौ भवेयदि पुनर्मित्रं च मित्रं च सत्
ते द्वे संमिलिते युगं प्रणयतो यस्मान्न योग्यं परम् ।।१२।।

दुर्विधिव्याधविद्धानां मित्रादन्यत्र भेषजम् ।
पीयूषमिव सन्मिष्टमौषधं रामबाणवत् ।।१३।।

येनातितिक्तमशितं विधिनोपनीतं
मित्रेण चानुपदमर्पितमाशि मिष्टम् ।
दूरानुभूतरसकोटिरसौ हि कोपि
मित्राधिराजिरकरोदिदमन्तरंगम् ।।१४।।

-०-०-०-०-०-

गा न्धि पा दा भि व न्द न म्

नमस्तुभ्यं महात्मने पुण्यश्लोकाय गान्धये ।
यो न: शान्तिमशिक्षय: ।।१।।

नम: सत्यव्रताय ते सत्याग्रहैकलेखये ।
य: सत्याज्जातु नाचल: ।।२।।

नमस्ते कर्मयोगिने तपोविध्वंसपाप्मने ।
य: पराभीतपौरुष: ।।३।।

नमस्ते त्यागमूर्तये लोकसंग्रहकारिणे ।
यो राष्ट्रमुदतिष्ठप: ।।४।।

नमो दीनानुकम्पिने सौमनस्यार्णवाय ते ।
योऽसन्नन् उदाचय: ।।५।।

नमः स्वातन्त्र्यमन्तवे सितानां दास्यदामभिः ।
यो नः पाशान् अकर्तीव: ।।६।।
नमो ज्योतिर्मयाय ते मार्थसुत्सृज्य गच्छताम् ।
यो नः पन्थानना दिशः ।।७।।
अक्षिणादीक्षिताय ते तितिक्षावर्मणे नमः ।
यः प्रीत्यैवाजयी विभः ।। ८।।
निःस्वार्थं यः पितेव नः सदा मङ्गलचिन्तयः ।
तस्मै ते कुर्मिहे नमः ।।९।।

-०-०-०-०-०-

बुद्धप्रणामांजलिः

कामक्रोधमदाद्यस्त्यक्तिलता येनार्यो निर्जिता
भूयस्तस्य किमस्ति येनभवनौ लोकत्रये वापि किम् ।

तादृक् कोपि स गौतमः समभवन् निर्जित्यराणां बलम् ।
तस्मै भारतभूतये नम नमो बुद्धाय शुद्धात्मने ।।

-०-०-०-०-०-०-

कन्या

आरादुपत्यकायां सर्पति मधुरा सरित् स्वच्छा ।
धन्या गुणसम्पन्ना कापि कुलीनां यथा कन्या ।।१।।
शान्ता शीतवती सा मन्दं मन्दं पुरः सरति ।
सुखभोगेषु व्यस्तात् लोकात् संसारिणो दूरम् ।।२।।
स्वं गन्तव्य स्थानं यतवत् दृढनिश्चया गन्तुम् ।
मन्थरगतिरपि सततं सुतरामव्याकुला याति ।। ३ ।।
यत्किञ्चित्या कुरुते तत्तत् भवितं च तत् सकलम् ।
स्वस्तुलका सर्वत्र स्वस्त्यन्येभ्यः प्रयुंजाना ।।४।।
शुचि वजाःस्वसंज्ञा सत्तिलक्ष्यं स्फटिकवद् धरे ।
आस्ते सांध्येतरया दीव्यति दिव्या प्रतिच्छाया ।।५।।

TO A YOUNG LADY

Sweet stream, that winds through yonder glade,
Apt emblem of a virtuous maid -
Silent and chaste she steals along,
Far from the world's gay busy throng:
With gentle yet prevailing force,
Intent upon her destined course;
Graceful and useful all she does,
Blessing and blest where'er she goes;
Pure-bosom'd as that watery glass,
And Heaven reflected in her face.

WILIAM COWPER (1731 - 1800)

Reader's indulgence is craved for the typographical errors which will be corrected in printing.

Any suggestions and remarks will be most welcome to the author.

123-c Pandara Road,
New Delhi.

B. Ch. Chhabra

Reader's indulgence is craved for the typographical errors which will be corrected in printing.

Any suggestions and remarks will be most welcome to the author.

123-c Pandara Road,
New Delhi.

B. Ch. Chhabra